श्रम् । नेत्राभ्यामाकुलं वक्त्रं मुहुः कुर्वन् भ्रमन्मुहुः । संहृष्टरोमा ग्लानाक्षः क्षिप्तचित्त इव श्वसन् । हलायुधमभिक्रुद्धः साक्षेपमिदमब्रवीत्” । तेन बलरामस्याभिभवे ततस्तस्य कृष्णेन सह युद्धे पराजयकथा १८२ अ०

“स्मृत इत्यभिविज्ञाय ज्वरं शत्रुनिसूदनः । कृष्णो भुजबलात्तन्तु चिक्षेपाथ महीतले । मुक्तमात्रस्तु बाहुभ्यां कृष्णदेहं विवेश सः । अमुक्त्वा विग्रहन्तस्य कृष्णस्याप्रतिमौजसः । स ह्याविष्टस्तदा तेन ज्वरेणाप्रतिमौजसा । कृष्णः स्खलन्निव मुहुः क्षितौ गाढं व्यवर्त्तत । जृम्भते श्वसते चैव स्खलते च पुनः पुनः । रोमाञ्चोत्थितगात्रस्तु निद्रया चाभिभूयते । ततः स्थैर्यं समालम्ब्य कृष्णः परपुरञ्जयः। विकुर्वाणो महायोगी जृम्भमाणः पुनः पुनः। ज्वराभिभूतमात्मानं विज्ञाय पुरुषोत्तमः । सोऽसृजज्ज्वरमन्यं तु पूर्वज्वरविनाशनम् । घोरं वैष्णवमत्युग्रं सर्वप्राणिभयङ्करम् । स सृष्टमात्रस्तेजस्वी बलवान् भीमविक्रमः । कृष्णज्वरो ज्वरं पूर्वं गृहीत्वा स्वेन तेजसा । कृष्णाय हृष्टः प्रायच्छत्तं जग्राह ततो हरिः । ततस्तं परमक्रुद्धो वासुदेवो महाबलः । स्वगात्रात् स्वज्वरेणैव निरक्रामयत् वीर्य्यवान् । आविध्य भूतले चैनं शतधा कर्त्तुमुद्यतः । व्याघोषयज्ज्वरस्तत्र भोः परित्रातुमर्हसि । आविध्यमाने तस्मिंस्तु कृष्णेनामिततेजसा । अशरीरा ततो वाणी तमुवाचान्तरीक्षगा । कृष्ण ! कृष्ण ! महाबाहो ! यदूनां नन्दिवर्द्धन ! । मा बधीर्ज्वरमेतं तु रक्षणीयस्त्वयाऽनघ ! । इत्येवमुक्ते वचने तं मुमोच हरिः स्वयम् । भूतभव्यभविष्यस्य जगतः परमो गुरुः । कृष्णस्य पादयोर्मूर्ध्ना शरणं स गतो ज्वरः । प्रणम्य च हृषीकेशं ज्वरो वाक्यमथाब्रवीत् । शृणुष्व मम गोविन्द ! विज्ञाप्यं यदुनन्दन ! । यो मे मनोरथो देव ! तं त्वं कुरु महाभुज ! । अहमेको ज्वरस्तात ! नान्यो लोके ज्वरो भवेत् । त्वत्प्रसादाद्धि देवेश ! वरमेतं वृणोम्यहम् । देव उवाच । एवमस्तु भद्रं ते यथा त्वं ज्वर ! काङ्क्षसे । वरार्थिनां वरो देयो भवांश्च शरणागतः। एक एव ज्वरो लोके भवानस्तु यथा पुरा । योऽयं मया ज्वरः सृष्टो मय्येवैष प्रलीयताम् । वैशम्पायन उवाच । एवमुक्ते तु वचने ज्वरं प्रति महायशाः। कृष्णः प्रहरतां श्रेष्ठः पुनर्वाक्यमुवाच ह । कृष्ण उवाच । शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि । सर्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे । त्रिधा विभजस्व चात्मानं मत्प्रियं यदि काङ्क्षसे । चतुष्पदान् भजैकेन द्वितीयेन च स्थावरान् । तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते । त्रिधाभूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वर ! । चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् । एकान्तरश्चतुर्भागः खोरकश्च चतुर्थकः । मानुषेष्वेकपादेन वस त्वं प्रविभज्य वै । जातिष्वथावशेषेषु निवस त्वं शृणुष्व मे । वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः । पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च । पद्मिनीषु हिमं भूत्वा पृथिव्यामपि चोषरः । अपान्तु नीलिकां भूयाः शिखोद्भेदश्च बर्हिणाम् । गैरिकः पर्वतेष्वेव मत्प्रसादाद्भविष्यसि । गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि । एवं विविधरूपेण भविष्यसि महीतले । दर्शनात् स्पर्शनाच्चैव प्राणिनां बधमेष्यसि । ऋते देवमनुष्यांश्च नान्यस्त्वां विषहिष्यते” ।

ज्वराश्च नानादेवसृष्टा यथोक्तं हरिवं० १९८अ० “पितामहमुखोद्भूता रौद्रा रुद्राङ्गसम्भवाः । कुमारस्कन्दजाश्चैव ज्वरा वै वैष्णवादयः” “स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति” माघः ।

**ज्वरकालकेतुरस** पु० ज्वरस्य कालकेतुरिव कर्म्म० ।

“रसं विषं गन्धकताम्रकञ्च मनःशिलारुष्करतालकञ्च । विमर्द्द्य वज्रीपयसा समांशं गजाह्वयं तत्र पुटं विदध्यात् । द्विगुञ्जमस्यैव मधुप्रयुक्तं ज्वरं निहन्त्यष्टविधं महोग्रम् । पुरा भवान्यै कथितो भवेन नृणां हिताय ज्वरकालकेतुः” भैषज्यर० उक्ते औषधभेदे ।

**ज्वरकुञ्जरपारीन्द्ररस** पु० ज्वर एव कुञ्जरस्तस्य पारीन्द्रः सिंह इव हिंसकत्वात् तादृशो रसः । भैषज्यर० उक्ते ज्वरनाशके औषधभेदे । तल्लक्षणं तत्रोक्तं यथा

“मूर्च्छितं रसकर्षैकं तदर्द्धं जारिताभ्रकम् । तारं ताम्रञ्च रसजं रसकं ताम्रकं तथा । मौक्तिकं विद्रुमं लौहं गिरिजं गैरिकं शिला । गन्धकं हेमसारञ्च पलार्द्धञ्च पृथक् पृथक् । क्षीरावी सुरवल्ली च शोथघ्नी गणिकारिका । आटामला जयन्तीवृक्षिका च सतिक्ता तु सुदर्शना । अग्निजिह्वा पूतितैला स्थूर्पपर्णी प्रसारिणी । प्रत्येकस्वरसं दत्त्वा मर्दयेत् त्रिदिनावधि । भक्षयेत् पर्णखण्डेन चतुर्गुञ्जाप्रमाणतः । महाग्निकारको रोग सङ्करघ्नः प्रयोगराट् । सततं सन्ततान्येद्युस्तृतीयकचतुर्थकान् । ज्वरान् सर्वान् निहन्त्याशु भास्करस्तिमिरं तथा । कासं श्वासं प्रमेहञ्च सशोथं पाण्डुकामलाम् । ग्रहणीं क्षयरोगञ्च सर्वोपद्रवसंयुतम् । ज्वरकुञ्जरपारीन्द्रः प्रथितः पृथिवीतले”